# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| **कक्षा – आचार्य – २** | **प्रश्नपत्रम् – ४** | **गुणाः – ५०** |
| **विषयः – धर्मशास्त्रम्** | **सत्रम् – ४** | **समयः – १० तः १२** |
| **दिनाङ्कः – १६/०७/२०२१** | **सन्दर्भग्रन्थः – कृत्यसारसमुच्चयः** | |

**सूचना - निम्नलिखितेषु एकादशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः।**
**प्रत्येकं प्रश्नस्य समानगुणाः। (१०)**

**प्रश्नः १ अधोलिखितेषु द्वयोः उत्तरं लिखत।**

१ ग्रहणादौ श्राद्धादीनां विचारं ग्रन्थदिशा निरूपयत।

२ जन्मदिनकृत्यं यथाग्रन्थं विविच्यताम्।

३ नाद्यात् सूर्यग्रहात्पूर्वमह्निसायं शशिग्रहात्।
ग्रहकाले च नाश्नीयात् स्नात्वाश्नीयाच्च मुक्तये॥ इति ग्रहणकाले भक्ष्याभक्ष्यविचारं यथाग्रन्थं विविच्यताम्।

४ इन्द्राग्नी यत्र हूयेते मासादिः सः प्रकीर्तितः।
अग्निष्टोमः स्मृतो मध्ये समाप्तौ पितृसोमकौ॥ इति मलमासविचारं यथाग्रन्थं विविच्यताम्।

**प्रश्नः २** भोजनव्यवस्थाविचारे अतिथिम् अदत्वा भोजने दोषनिरूपणं यथाग्रन्थं विविच्यताम्।

**प्रश्नः ३** स्त्रीणां स्वामिनः आज्ञां विना व्रतादिकार्यनिषेधं निरूपयत।

**प्रश्नः ४** सन्ध्यायाः महत्त्वं तथा करमाला-जपविधिं यथाग्रन्थं निरूपयत।

**प्रश्नः ५** एकस्मिन् दिने दम्पत्योः श्राद्धे कर्तव्याकर्तव्यं यथाग्रन्थं निरूपयत।

**प्रश्नः ६ अधोलिखितेषु द्वयोः सविस्तृतमुत्तरं लिखत।**

१ पञ्चमहायज्ञ-निरूपणं कुरुत।

२ अशौचे प्रतिरोधकं यथाग्रन्थं निरूपयत।

३ अक्षयतृतीयायां गङ्गायां घृतधेनुदानं यथाग्रन्थं निरूपयत।

४ गवादिमूल्यनिर्णयं यथाग्रन्थं निरूपयत।

**प्रश्नः ७** कन्यादानाधिकारिणः के ? यथाग्रन्थं निरूपयत ।

**प्रश्नः ८** बालानां प्राथमिक-केशकर्तनं निरूपयत ।

**प्रश्नः ९** पुरुषोत्तमक्षेत्रमहत्त्वं निरूपयत ।

**प्रश्नः १०** पतितानाम् अपि गयाश्राद्धमहत्त्वं निरूपयत ।

**प्रश्नः ११ दशानां प्रश्नानां लघूत्तराणि लिखत ।**

१ जन्मराश्यादौ ग्रहणदर्शने दोषः भवति न वा ?
२ ग्रहणे श्राद्धस्य किं फलम् ?
३ मलमासः कदा भवति ?
४ जन्मदिने क्षौरे कृते सति कस्य नाशो भवति ?
५ उत्तमः प्रणामः क उच्यते ?
६ पञ्चमहायज्ञाः के ?
७ सङ्कल्पितव्रतम् अशौचे कर्तव्यं न वा ?
८ कन्याजनने कति दिनानि अशौचम् ?
९ सपिण्डाशौचं विप्रस्य कति दिनानि भवति ?
१० सपिण्डाशौचं क्षत्रियस्य कति दिनानि भवति ?
११ सपिण्डाशौचं वैश्यस्य कति दिनानि भवति ?
१२ सपिण्डाशौचं शूद्रस्य कति दिनानि भवति ?
१३ अपुत्रायां मृतायां कः सपिण्डं कुर्यात् ?
१४ पितुः अभावे कन्यादानं कः कुर्यात् ?
१५ अविभक्तेषु केन श्राद्धं क्रियते ?

****